लशुनादि जैह्म्यं मित्रे कुटिलत्वं पुंसि मैथुनं पुरुषे ग्राम्यधर्मकरणम्। अत्र कामतः सान्तपनं तत्र धेनुद्वयम्। अकामतः प्राजापत्यं तत्र धेनुरेका। एतच्चाभ्यासे बोद्धव्यम्। रुजः कृत्ये तत्र विशेषमाह मनुः "अवगुर्य चरेत् कृच्छ्रमतिकृच्छ्रं निपातने। कृच्छ्रातिकृच्छ्रं कुर्वीत विप्रस्योत्पाद्य शोणितम्"। तथा याज्ञवल्क्यः "विप्रदण्डोद्यमे कृच्छ्रमतिकृच्छ्रं निपातने। कृच्छ्रातिकृच्छ्रोऽसृक्पाते कार्य्योऽभ्यन्तरशोणिते"। अत्र दण्डशब्दः शस्त्रमपि लक्षयति। अतिकृच्छ्रे धेनुत्रयं कृच्छ्रातिकृच्छ्रे धेनुपञ्चकम्। यमः ":कृच्छ्रातिकृच्छ्रं कुर्वीत चान्द्रायणमथाचरेत्। दशसंख्याश्च गा दद्यादङ्गच्छेदो यदा भवेत्"। अत्र द्विजाङ्गच्छेदे व्रतद्वयस्य गोदानानाञ्च समुच्चयः। विशेषमाह वृहस्पतिः, "काष्ठादिना ताड़यित्वा त्वग्भेदे कृच्छ्रमाचरेत्। अस्थिभेदेऽतिकृच्छ्रन्तु पराकं चाङ्गकर्त्तने"।

**जातिमात्र** न० जातिरेव जाति+एवार्थे मात्रच्। स्वाध्यायादिहीने जन्ममात्रे "जातिमात्रेण किं कश्चिद्धन्यते पूज्यते क्वचित्" हितो०। "जातिमात्रोपजीवी वा कामं स्यात् ब्राह्मणब्रुवः"। "अव्रतानाममन्त्राणां जातिमात्रोपजीविनाम्। नैषां प्रतिग्रहो देयो न शिला तारयेच्छिलाम्" मनुः।

**जातिमाला** जातिविशेषज्ञापके ग्रन्थभेदे।

**जातिवैर** न० जात्या स्वभावेन वैरम्। स्वभाववैरे यथा अहिनकुलयोः उपयमशब्दे योनिकूटप्रकरणे १२५० पृ० दृश्यम्।

**जातिशक्तिवाद** पु० जातौ शक्तेर्वादः। शब्दानां जातौ शक्तिसमर्थके कथाभेदे स च वादः शब्दशक्तिप्र० पूर्वपक्षविधया दर्शितो यथा

"ननु गामानयेत्यादौ गोत्वादिकर्मताकत्वेनैवानयनादेरन्वयधीर्गोत्वादिशक्तत्वेन पदज्ञानस्य गोत्वाद्यन्वयबुद्धिं प्रत्येव हेतुत्वात् सुवर्थकर्मत्वादौ स्वाश्रयवृत्तित्वसम्बन्धेनैव प्रकृत्यर्थस्य गोत्वादेः साकाङ्क्षत्वात् गवादिकर्मताकत्वेन बोधस्तूत्तरकालमाक्षेपात् कर्मत्वं गोवृत्ति गोत्वनिष्ठकर्मतात्वात्, आनयनं गोवृत्तिकर्मताकं गोत्ववृत्तिकर्मताकत्वादित्याद्यनुमानसाम्राज्यात्। न च वस्तुगत्या यद्गोत्वशक्तत्वं तज्ज्ञानस्य हेतुत्वे गोपदं जातिशक्तमित्येवंग्रहादपि शुद्धगोत्वस्यान्वयबोधापत्तिः गोत्वत्वावच्छिन्नशक्तत्वप्रकारकज्ञानत्वेन तथात्वे च लाघवाद्गोत्वावच्छिन्नशक्तताप्रकारकज्ञानत्वेनैव हेतुत्वं गोत्वत्वाद्यप्रवेशादितिवाच्यं गोपदं गोत्वशक्तमित्याकारकज्ञानत्वेन हेतुतायां शुद्धस्यैव गोत्वस्य विषयतासम्बन्धेन शक्त्यंशे विशेषणत्वेन गोत्वत्वादिप्रवेशगौरवस्यायोगात्। न हि समवायान्यसम्बन्धेन जातेः प्रकारतायां धर्म्मावच्छिन्नत्वनियमो मानाभावात् अयं गौरित्यादिव्यवसायोत्तरमिमं गोत्वेन जानामीत्याकारे तस्य ज्ञाततालिङ्गकानुमानेऽनुव्यवसाये वा व्यभिचाराच्च प्रागनुपस्थित्या गोत्वत्वादेस्तत्रोपनयायोगात्। एतेन जातेर्निरवच्छिन्नप्रकारत्वस्य समवायसंसर्गावच्छिन्नत्वनियमात् केवलस्य गोत्वादेः शक्त्यंशे विषयतया सुवर्थकर्मत्वांशे च परम्परया प्रकारत्वायोग इत्यपि प्रत्युक्तम्, उक्तस्थल एव व्यभिचारात्। न चैवं कालो गौः पदं गौरित्यादिप्रत्ययोऽपि प्रमा स्यात् कालिकादिसम्बन्धेन गोत्वादिमति तत्प्रकारकत्वादिति वाच्यं कालिकादिसम्बन्धेन गोत्वादेः प्रामाण्यस्य गोत्वत्वाद्यवच्छिन्नप्रकारतागर्भत्वेन तादृशमतेः प्रमात्वायोगात् अन्यथा घटत्वादिजातेः संस्थानसमवेतत्वमते संयोगो घट इत्यादिप्रतीतेः समवायेन प्रमात्वस्य दुर्वारतापत्तेः शाब्दस्येव प्रत्यक्षस्यापि कालो गौरित्यादिबोधस्य नियमतो गवाद्यभेदावगाहित्वेनैवाप्रमात्वसम्भवाच्चेति भट्टमतानुवर्त्तिनः।"

जातिशक्तिवादिप्रभाकरमतं च तत्रैवोक्तं यथा

"प्राभाकरास्तु गोत्वशक्तत्वेन ज्ञातं पदं तादृश्येण गोशाब्दत्वावच्छिन्नं प्रत्येव हेतुरतो गोत्वशक्तिग्रहान्न गोत्वेन गवयादेः न वा द्रव्यत्वादिना गोरन्वयधियोऽतिप्रसङ्गः। नचैवं जातेरिव व्यक्तेरपि शक्यत्वमावश्यकं न हि गवादिपदस्य शक्यत्वं जन्यत्वमपि तु जन्यशाब्दधीविषयत्वं तच्च गोत्वस्येव गोरप्यविशिष्टमिति वाच्यं गवादिपदधर्मिकस्वशक्तताज्ञानत्वावच्छिन्नशाब्दधीजनकतावच्छेदकत्वेन गोत्वादेरेव गवादिपदशक्यत्वात् गोत्वशक्तताऽपेक्षया गोशक्तत्वस्य गुरुतया तज्ज्ञानत्वस्य गोशाब्दं प्रति जनकतानवच्छेदकत्वात्। अतएवान्वयबुद्धेरात्मस्वात्मत्वाद्यवगाहित्वेऽपि न तेषां पदशक्यत्वम्। अस्तु वा गोत्वादिशक्तत्वेन ज्ञातं पदं गोत्वादिशाब्दत्वावच्छिन्नं प्रत्येव हेतुर्विशेष्यतया तादृशशाब्दं प्रति समवायेन गोत्वस्य नियामकत्वकल्पनाच्च नातिप्रसङ्गः गोत्वादिना गवादेरिव गवादेर्गोत्वादिनान्वयबोधत्वावच्छिन्नं प्रत्यपि विनिगमकाभावेन गोत्वादिशक्तिज्ञानत्वेन हेतुत्वमपेक्ष्य गोत्वशाब्दत्वावच्छिन्नं प्रत्येव गोत्वस्य तच्छक्तत्वज्ञानस्य च द्वयोः कारणतायामेव लाघवात्, वस्तुतो गोत्वशाब्दं प्रति गोत्वशक्तिज्ञानमेव हेतुर्न तु गोत्वमपि जातिव्यक्त्योस्तुल्य-